# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-3) | **प्रश्नपत्रम्**-७ (New & Old) | **गुणाः** - ७० |
| **विषयः** - धर्मशास्त्रम् | **कोड**- **CE- 2-3-3** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - ११/१२/२०१८ | **सन्दर्भग्रन्थः**- याज्ञवल्क्यस्मृतिः (मिताक्षरासहिता आचाराध्यायः) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः ससन्दर्भं व्याख्या विधेया ।** **१०**

१. श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम् ॥

२. रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके ।
अभावे ज्ञातपस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ॥

३. स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।
उपनीय दद्द्वेदमाचार्यः स उदाहृतः ॥

**प्र-२ एकस्य सविस्तरेणोत्तरं लिखत ।** **१०**

१. कन्यायाः बाह्याभ्यन्तरलक्षणानि दत्त्वा ब्राह्मविवाहं वर्णयत ।

२. उपोद्घातप्रकरणं समीक्षत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वयोः ससन्दर्भं व्याख्या विधेया ।** **१०**

१. अतिथित्वेन वर्णानां देयं शक्यानुपूर्वशः ।
अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः ॥

२. भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ॥

३. गोब्राह्मणानलान्नानि नोच्छिष्टो न यदा स्पृशेत् ।
न निन्दा ताडने कुर्यात्पुत्रं शिष्यं च ताडयेत् ॥

**प्र-४ एकस्य सविस्तरेणोत्तरं लिखत ।** **१०**

१. गृहस्थधर्मान् पञ्चयज्ञान् च विलिख्य साधारणधर्मान् लिखत ।

२. द्रव्यशुद्धिप्रकरणसारं लिखत ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ द्वयोः ससन्दर्भं व्याख्या विधेया । १०**

१. तपस्तप्त्वाऽसृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये ।

तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥

२. आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।

प्रयच्छन्ति तथा राज्यं प्राप्ता नृणां पितामहाः ॥

३. यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् ।

एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥

**प्र-६ एकस्य निबन्धात्मकमुत्तरं लेखनीयम् । १०**

१. गोदानफलं वेददानफलञ्च विलिख्य त्रिविधं श्राद्धं वर्णयत ।

२. ग्रहशान्तिप्रकरणसारं लिखत ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१. बालकस्य चतुर्थे मासि कः संस्कारः क्रियते?

२. ब्राह्मणस्योपनयनं कदा कार्यम्?

३. कति वर्णाः ? के च ते?

४. स्त्रीणां कः संस्कारः समन्त्रकः कार्यः ?

५. माता केभ्यः गरीयसी?

६. ब्राह्मणः द्विज संज्ञां कदा लभते?

७. द्विजातीनां निःश्रेयसकरः को भवति?

८. सूर्याभिमुखं स्थित्वा कदा जपः कार्यः ?

९. स्त्रियाः परो धर्मः कः ?

१०. जपयज्ञसिद्ध्यर्थं कां विद्यां जपेत्?

११. आत्मनो हितं कदा चिन्तयेत्?

१२. कस्य समक्षम् एकवासा नाश्नीयात्?

१३. कं संपूज्य मुनयोऽब्रुवन्?

१४. वसिष्ठः कस्य शास्त्रस्य प्रयोजकः ?

१५. का नाम महाव्याहृतिः?

–००–